श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे

# ॥ षष्ठः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ षष्ठः सर्गः ॥

## हनुमता रावणस्यान्येषां च रक्षसां गृहेषु सीताया अनुसन्धानम्

स निकामं विमानेषु विचरन् कामरूपधृक्।
विचचार कपिर्लङ्कां लाघवेन समन्वितः ॥ **5.6.1** ॥

आससादा च लक्ष्मीवान् राक्षसेन्द्रनिवेशनम्।
प्राकारेणार्कवर्णेन भास्वरेणाभिसंवृतम् ॥ **5.6.2** ॥

रक्षितं राक्षसैर्भीमैः सिंहैरिव महद् वनम्।
समीक्षमाणो भवनं चकाशे कपिकुञ्जरः ॥ **5.6.3** ॥

रूप्यकोपहितैश्चित्रैस्तोरणैर्हेमभूषणैः।
विचित्राभिश्च कक्ष्याभिर्द्वारैश्च रुचिरैर्वृतम् ॥ **5.6.4** ॥

गजास्थितैर्महामात्रैः शूरैश्च विगतश्रमैः।
उपस्थितमसंहार्यैर्हयैः स्यन्दनयायिभिः ॥ **5.6.5** ॥

सिंहव्याघ्रतनुत्राणैर्दान्तकाञ्चनराजतीः।
घोषवद्भिर्विचित्रैश्च सदा विचरितं रथैः ॥ **5.6.6** ॥

बहुरत्नसमाकीर्णं परार्ध्यासनभूषितम्।
महारथसमावापं महारथमहासनम् ॥ **5.6.7** ॥

दृश्यैश्च परमोदारैस्तैस्तैश्च मृगपक्षिभिः।
विविधैर्बहुसाहस्रैः परिपूर्णं समन्ततः ॥ **5.6.8** ॥

www.prapatti.com

विनीतैरन्तपालैश्च रक्षोभिश्च सुरक्षितम्।
मुख्याभिश्च वरस्त्रीभिः परिपूर्णं समन्ततः ॥ **5.6.9** ॥

मुदितप्रमदारत्नं राक्षसेन्द्रनिवेशनम्।
वराभरणसंह्रादैः समुद्रस्वननिःस्वनम् ॥ **5.6.10** ॥

तद् राजगुणसम्पन्नं मुख्यैश्च वरचन्दनैः।
महाजनसमाकीर्णं सिंहैरिव महद् वनम् ॥ **5.6.11** ॥

भेरीमृदङ्गाभिरुतं शङ्खघोषविनादितम्।
नित्यार्चितं पर्वसुतं पूजितं राक्षसैः सदा ॥ **5.6.12** ॥

समुद्रमिव गम्भीरं समुद्रसमनिःस्वनम्।
महात्मनो महद् वेश्म महारत्नपरिच्छदम् ॥ **5.6.13** ॥

महारत्नसमाकीर्णं ददर्श स महाकपिः।
विराजमानं वपुषा गजाश्वरथसङ्कुलम् ॥ **5.6.14** ॥

लङ्काभरणमित्येव सोऽमन्यत महाकपिः।
चचार हनुमांस्तत्र रावणस्य समीपतः ॥ **5.6.15** ॥

गृहाद् गृहं राक्षसानामुद्यानानि च सर्वशः।
वीक्षमाणोऽप्यसन्त्रस्तः प्रासादांश्च चचार सः ॥ **5.6.16** ॥

अवप्लुत्य महावेगः प्रहस्तस्य निवेशनम्।
ततोऽन्यत् पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् ॥ **5.6.17** ॥

अथ मेघप्रतीकाशं कुम्भकर्णनिवेशनम्।
विभीषणस्य च तथा पुप्लुवे स महाकपिः ॥ **5.6.18** ॥

महोदरस्य च तथा विरूपाक्षस्य चैव हि।



www.prapatti.com

विद्युज्जिह्वस्य भवनं विद्युन्मालेस्तथैव च ॥ **5.6.19** ॥

वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः।
शुकस्य च महावेगः सारणस्य च धीमतः ॥ **5.6.20** ॥

तथा चेन्द्रजितो वेश्म जगाम हरियूथपः।
जम्बुमालेः सुमालेश्च जगाम हरिसत्तमः ॥ **5.6.21** ॥

रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च।
वज्रकायस्य च तथा पुप्लुवे स महाकपिः ॥ **5.6.22** ॥

धूम्राक्षस्याथ सम्पातेर्भवनं मारुतात्मजः।
विद्युद्रूपस्य भीमस्य घनस्य विघनस्य च ॥ **5.6.23** ॥

शुकनाभस्य चक्रस्य शठस्य कपटस्य च।
ह्रस्वकर्णस्य दंष्ट्रस्य लोमशस्य च रक्षसः ॥ **5.6.24** ॥

युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य सादिनः।
विद्युज्जिह्वद्विजिह्वानां तथा हस्तिमुखस्य च ॥ **5.6.25** ॥

करालस्य पिशाचस्य शोणिताक्षस्य चैव हि।
प्लवमानः क्रमेणैव हनुमान् मारुतात्मजः ॥ **5.6.26** ॥

तेषु तेषु महार्हेषु भवनेषु महायशाः।
तेषामृद्धिमतामृद्धिं ददर्श स महाकपिः ॥ **5.6.27** ॥

सर्वेषां समतिक्रम्य भवनानि समन्ततः।
आससादाथ लक्ष्मीवान् राक्षसेन्द्रनिवेशनम् ॥ **5.6.28** ॥

रावणस्योपशायिन्यो ददर्श हरिसत्तमः।
विचरन् हरिशार्दूलो राक्षसीर्विकृतेक्षणाः ॥ **5.6.29** ॥

www.prapatti.com

शूलमुद्गरहस्तांश्च शक्तितोमरधारिणः।
ददर्श विविधान् गुल्मांस्तस्य रक्षःपतेर्गृहे ॥ **5.6.30** ॥

राक्षसांश्च महाकायान् नानाप्रहरणोद्यतान्।
रक्तान् श्वेतान् सितांश्चापि हरींश्चापि महाजवान् ॥ **5.6.31** ॥

कुलीनान् रूपसम्पन्नान् गजान् परगजारुजान्।
शिक्षितान् गजशिक्षायामैरावतसमान् युधि ॥ **5.6.32** ॥

निहन्तॄन् परसैन्यानां गृहे तस्मिन् ददर्श सः।
क्षरतश्च यथा मेघान् स्रवतश्च यथा गिरीन् ॥ **5.6.33** ॥

मेघस्तनितनिर्घोषान् दुर्धर्षान् समरे परैः।
सहस्रं वाहिनीस्तत्र जाम्बूनदपरिष्कृताः ॥ **5.6.34** ॥

हेमजालैरविच्छिन्नास्तरुणादित्यसन्निभाः।
ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने ॥ **5.6.35** ॥

शिबिका विविधाकाराः स कपिर्मारुतात्मजः।
लतागृहाणि चित्राणि चित्रशाला गृहाणि च ॥ **5.6.36** ॥

क्रीडागृहाणि चान्यानि दारुपर्वतकानि च।
कामस्य गृहकं रम्यं दिवागृहकमेव च ॥ **5.6.37** ॥

ददर्श राक्षसेन्द्रस्य रावणस्य निवेशने।
स मन्दरसमप्रख्यं मयूरस्थानसङ्कुलम् ॥ **5.6.38** ॥

ध्वजयष्टिभिराकीर्णं ददर्श भवनोत्तमम्।
अनन्तरत्ननिचयं निधिजालं समन्ततः।
धीरनिष्ठितकर्माङ्गं गृहं भूतपतेरिव ॥ **5.6.39** ॥



www.prapatti.com

अर्चिर्भिश्चापि रत्नानां तेजसा रावणस्य च।
विरराज च तद् वेश्म रश्मिवानिव रश्मिभिः ॥ **5.6.40** ॥

जाम्बूनदमयान्येव शयनान्यासनानि च।
भाजनानि च शुभ्राणि ददर्श हरियूथपः ॥ **5.6.41** ॥

मध्वासवकृतक्लेदं मणिभाजनसङ्कुलम्।
मनोरममसम्बाधं कुबेरभवनं यथा ॥ **5.6.42** ॥

नूपुराणां च घोषेण काञ्चीनां निःस्वनेन च।
मृदङ्गतलनिर्घोषैर्घोषवद्भिर्विनादितम् ॥ **5.6.43** ॥

प्रासादसङ्घातयुतं स्त्रीरत्नशतसङ्कुलम्।
सुव्यूढकक्ष्यं हनुमान् प्रविवेश महागृहम् ॥ **5.6.44** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे षष्ठः सर्गः ॥

www.prapatti.com